# Shri Ramakrishna Smaranam

# श्रीरामकृष्णस्मरणम्

## Document Information

Text title : Shri Ramakrishna Smaranam

File name : rAmakRRiShNasmaraNam.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Ramendra Sundara Bhaktitirtha

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णस्मरणम्

नमः श्रीरामकृष्णाय सर्वमङ्गलहेतवे ।
सर्वसिद्धिप्रदात्रे च मूर्तये ब्रह्मणे नमः ॥ १॥

लीलावतारः श्रीरामकृष्णः शेषयुगे हरिः ।
कलेर्जीवान्समुद्धर्तुं वैकुण्ठाद्वसुधातले ॥ २॥

एष मातरि चन्द्रायां ब्राह्मण्यां भगवान् स्वयम् ।
ब्रह्मज्ञस्य ब्राह्मणस्य पितुः श्रीक्षुदिरामतः ॥ ३॥

प्रादुर्भूतः कर्मकार पुष्करिण्यां सनातनः ।
स्वर्णगौरः शुभ्रवस्त्रो भूषणादिविवर्जितः ॥ ४॥

कामिनीकाञ्चनत्यागी कालिकासाधने रतः ।
पृथिव्यां सन्ति ये धर्मास्तेषां ये धर्मयाजकाः ॥ ५॥

तत्सर्वमतमाश्रित्य तत्तत्सिद्धिमवाप्तवान् ।
कालिकापुत्ररूपोऽसौ निर्विकल्पसमाधिमान् ॥ ६॥

जगदम्बा स्तन्यपायी स्वसुतं जननी यथा ।
कृपया कालिकादेव्याः स्वस्य साधन शक्तितः ॥ ७॥

साधारणकन्यकेव काली प्रत्यक्षतां गता ।
प्रायेनैवं साधनायां गता द्वादशवत्सराः ॥ ८॥

ततः सिद्धस्वरूपेण स्वधाम्नि दक्षिणेश्वरे ।
विराजितः स्वीयां लीलां पार्षदानामदर्शयत् ॥ ९॥

उक्तं श्रीरामकृष्णेन यत्कथामृतमुत्तमम् ।
भूर्लोकस्या जनास्तेन जानन्ति मधुसूदनम् ॥ १०॥

ईदृग्युगावतारेषु नैकस्मिन्नपि दृश्यते ।
केवलं श्रीरामकृष्णे सर्वकारणकारणे ॥ ११॥

दृश्यते श्रीरासमण्या मन्दिराभ्यन्तरे तदा ।
स्त्रीबालबालिशानाञ्च यद्वाक्यममृतायते ॥ १२॥

अत्यन्तासज्जनेभ्योऽपि यद्दत्तं ठाकुरेण हि ।
तेनानुभूतं तैः सर्वैस्तद्विष्णोः परमं पदम् ॥ १३॥

सर्वत्र सर्वभावेन सर्वजातिषु सर्वदा ।
साधुसज्जनसंन्यासी संसारीब्रह्मचारिभिः ॥ १४॥

सुपूजितो रामकृष्णः पृथिव्यां सर्वमानवैः ।
तेन सर्वयुगश्रेष्ठाऽवतारोऽयं भवेद्ध्रुवम् ॥ १५॥

दन्ते विधृत्य तृणकं पदयोर्निपत्य
कृत्वोत्तमाङ्गनतमेतदहं ब्रवीमि ।
भो भ्रातरः सकलमेव विहाय दुरात्
श्रीरामकृष्ण चरणे कुरुतानुरागम् ॥ १६॥

श्रीरामकृष्ण चरणानुरागात् प्राप्नुवन्ति यत् ।
सर्वे भवन्तः शृण्वन्तु सावधानमिदं वचः ॥ १७॥

मुक्तिर्नापि सुखायते विबुधपूराकाशपुष्पायते
दुर्दान्तेन्द्रिय कालकुण्डलिचयः प्रोत्खातदन्तायते ।
पृथ्वी पूर्णसुखायते विधिसुरेशादिश्च कीटायते
यत्कारुण्य कटाक्षवैभववतस्तं रामकृष्णं भज ॥ १८॥

सम्पूज्य तद्भक्तवर्गान् पृथिव्यां सर्वसज्जनाः ।
भजन्तु भक्तिभावेन रामकृष्णपदाम्बुजम् ॥ १९॥

नरनारीसमीपे मे गलवस्त्रकृताञ्जलेः ।
श्रीरामेन्द्रसुन्दरस्य द्विजस्येदं निवेदनम् ॥ २०॥

इति श्रीरामेन्द्रसुन्दरभक्तितीर्थ विरचितं
“श्रीश्रीरामकृष्णस्मरणम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Smaranam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*